यद्वद्वक्तुं न युक्तं प्रणवहरिपदाभ्यन्तरेऽन्यत्पदं तत् कृष्णेत्येतत्कदाचिन्मुनिशतवचनैर्वैदिकैर्ब्रह्मनिष्ठैः । तद्वद्रङ्गेशभक्तैः शमदमनियतैः साधुभिस्तत्त्वविद्भिः वक्तुं युक्तं न मध्ये सपदि नियतयोरेतयोः पद्यमन्यत् ॥८॥

शठरिपुरेक एव कमलापतिदिव्यकविः मधुरकविर्यथा च शठजिन्मुनिमुख्यकविः । यतिकुलपुङ्गवस्य भुवि रङ्गसुधाकविराट् वरवरयोगिनो वरदराजकविश्च तथा ॥९॥

इति श्रीशैलेशाष्टकं समाप्तम् ॥

श्रीवादिभीकरगुरुभिरनुगृहीतं

## श्रीवेङ्कटेशस्तोत्रम्

**वेदान्तदेशिककटाक्ष + + परवादिभयङ्करार्यम् ॥**

कमलाकुचचूचुककुङ्कुमतः नियतारुणितातुलनीलतनो ! ।
कमलायतलोचन ! लोकपते ! विजयी भव वेङ्कटशैलपते ! ॥१॥

सचतुर्मुखषण्मुखपञ्चमुखप्रमुखाखिलदैवतमौलिमणे ।
शरणागतवत्सल ! सारनिधे ! परिपालय मां वृषशैलपते ! ॥२॥

अतिवेलतया तव दुर्विषहैः अनुवेलकृतैरपराधशतैः ।
भरितं त्वरितं वृषशैलपते ! परया कृपया परिपाहि हरे ! ॥३॥

अधिवेङ्कटशैलमुदारमतेः जनताभिमताधिकदानरतात् ।
परदेवतया गदितान्निगमैः कमलादयितान्न परं कलये ॥४॥

कलवेणुरवावशगोपवधूशतकोटिवृतात् स्मरकोटिसमात् ।
प्रतिवल्लवि चाभिमतात् सुकृतात् वसुदेवसुतान्न परं कलये ॥५॥

अभिराम ! गुणाकर ! दाशरथे ! जगदेकधनुर्धर ! धीरमते ! ।
रघुनायक ! राम ! रमेश ! विभो ! वरदो भव देव ! दयाजलधे ! ॥६॥

अवनीतनयाकमनीयवरं रजनीकरचारुमुखाम्बुरुहम् ।
रजनीचरराजतमोमिहिरं कमनीयमहं रघुराममये ॥७॥

सुमुखं सुहृदं सुलभं सुखदं सुगुणं च सुजायममोघशरम् ।
अपहाय रघूद्वहमन्यमहं न कथंचन कंचन जातु भजे ॥८॥

विना वेङ्कटेशं न नाथो न नाथः सदा वेङ्कटेशं स्मरामि स्मरामि ।
हरे वेङ्कटेश प्रसीद प्रसीद प्रियं वेङ्कटेश प्रयच्छ प्रयच्छ ॥९॥

अहं दूरतस्ते पदाम्भोजयुग्मप्रणामेच्छयाऽऽगत्य सेवां करोमि ।
सकृत्सेवया नित्यसेवाफलं त्वं प्रयच्छ प्रयच्छ प्रभो ! वेङ्कटेश ! ॥१०॥

वृषशैलाधिप एव दैवतं नः वृषभाद्रीश्वर एव दैवतं नः ।
फणिशैलाधिप एव दैवतं नः भगवान् वेङ्कट एव दैवतं नः ॥११॥

श्रीश्रीनिवासः परदैवतं नः श्रीश्रीनिवासः परमं धनं नः ।
श्रीश्रीनिवासः कुलदैवतं नः श्रीश्रीनिवासः परमा गतिर्नः ॥१२॥

अज्ञानिना मया दोषान् अशेषान् विहितान् हरे ! ।
क्षमस्व त्वं क्षमस्व त्वं शेषशैलशिखामणे ॥१३॥

इति श्रीवेङ्कटेशस्तोत्रं समाप्तम् ॥

---

श्रीमदभिरामवरगुरुभिरनुगृहीता

## ॥ नक्षत्रमालिका ॥

---

**अस्मासु वत्सलतया कृपया च भूयः स्वेच्छावतीर्णमि(व)ह सौम्यवरं मुनीन्द्रम् ।**
**आचार्यपौत्रमभिरामवराभिधानम् अस्मद्गुरुं परमकारुणिकं नमामि ॥**

---

श्रीमान् पराङ्कुशमुनिर्जीयात् यज्ज्ञानमुद्रया । नेन्द्रियाश्वयुजो नृणां नित्यं विषयवीथयः ॥

यदुरसि भरणीया स्रग्विकसितवकुलानद्धा । स जयति महिमा नाथो मुररिपुपदसक्तो नः ॥

नन्ताऽनन्ताङ्घ्रिनलिनयुग्मे कर्ता लोकार्तिकबलनानाम् ।
भद्राय द्राविडनिगमानां द्रष्टा पुष्टाय वकुलभृत्स्यात् ॥३॥

स्यादेव सा मे फणितिश्शठारेः ययोदितोच्चैस्सरणिर्जनानाम् ।
आरोहिणी नाप्यवरोहिणी हि वेदोदिता तु द्वयमभ्युपैति ॥४॥

तिलकमाह न काचिदपि श्रुतौ त्रिजतामृगशीर्षसमुत्थिता ।
स्फुटतरं वकुलाभरणीयवाक् पुरुषमादिमशेषपदैरपि ॥५॥

पित्रादिस्सकलविधोऽपि बन्धुवर्गः यस्यासीत्सरसिजवासिनीसहायः ।
आविस्स्युर्घनकरुणारसावसेकैरार्द्रा मे वकुलभृतः कटाक्षपाताः ॥६॥